# गतानुगतिक: लोक:

## (विभक्तिप्रयोग: - सप्तमी विभक्ति)



**एकस्मिन् ग्रामे** एक: भिक्षुक: अस्ति । भिक्षाटनेन स: जीवति । अवशिष्टं धनं **पात्रे** स्थापयति । एकदा स: पश्यति, पात्रं पूर्णम् । तत: स: काशीविश्वनाथस्य दर्शनार्थं गच्छामि इति चिन्तयति । काशीं गच्छति । पदव्रजेन गच्छन् **पादयो**: पीडाम् अनुभवति । तथापि गच्छति । **मध्ये मध्ये** विश्रामं करोति । पुन: गच्छति । तस्य **श्रीविश्वनाथे** महान् विश्वास: । अत: तं स्मरन् दिनद्वयात् परं **काश्यां** प्रविशति । मन्दिरगमनात् पूर्वं **गङ्गानद्यां** स्नानम् अवश्यं करणीयम् इति नियम: । अत: स: तत्र स्नातुम् इच्छति । किन्तु धनपात्रं कुत्र स्थापयामि इति तस्य महती चिन्ता । चोरभयेन **नदीतीरे बालुकायां** गर्त्तं कृत्वा तत् स्थापयति । अभिज्ञानार्थं तस्य उपरि बालुकया शिवलिङ्गं करोति । आनन्देन **गङ्गायां** स्नानं च करोति ।

स्वल्पकालात् परम् एक: यात्री आगच्छति । स: **गङ्गाजले** एकं लोकं पश्यति । **नदीकूले** एकं शिवलिङ्गं च पश्यति । स: चिन्तयति । प्रायत: अत्र एका परम्परा अस्ति । य: शिवस्य दर्शनम् इच्छति, स: प्रथमत: गङ्गाकूले लिङ्गं रचयति । तत: स्नानं करोति । अनन्तरं दर्शनार्थं गच्छति । एवं चिन्तयित्वा स: अपि तथा आचरति ।

एवं बहव: यात्रिण: आगच्छन्ति । **नद्यां** लोकान्, **कूले** लिङ्गानि च पश्यन्ति । सर्वे शिवलिङ्गानि रचयन्ति । स्नानं च कुर्वन्ति । इदानीं भिक्षुकस्य स्नानं समाप्तम् । स: उपरि आगच्छति । असंख्यलिङ्गानि दृष्ट्वा चकित: भवति । निजशिवलिङ्गस्य अन्वेषणं करोति । न प्राप्नोति । कानिचित् लिङ्गानि नष्टीकरोति । यात्रिण: तं प्रमत्त: इति चिन्तयन्ति । सम्यक् च ताडयन्ति । स: क्रन्दति । बहुकष्टेन सञ्चितं धनपात्रं न प्राप्नोति । स: दु:खेन कथयति-

**''गतानुगतिक: लोक: न लोक: पारमार्थिक: ।**
**गङ्गासैकतलिङ्गेन नष्टं मे धनभाजनम् ।''**

| **भिक्षुक:, पात्रम्, गच्छन्, महती, गर्त्तम्, अभिज्ञानार्थम्, बालुकया, यात्री** |
|---|

## टिप्पणी

ଗଳ୍ପରେ ବର୍ତ୍ତମାନ କାଳରେ ପ୍ରଯୁକ୍ତ କ୍ରିୟାପଦ ଗୁଡ଼ିକ ଅତୀତ କାଳକୁ ସୂଚାଉଛି ।

**शब्दार्थः -**

गतानुगतिकः - अनुकरणप्रियः (ଅନୁକରଣପ୍ରିୟ), भिक्षाटनेन - भिक्षाद्वारा (ଭିକ୍ଷାମାଗି), पादयोः - पादद्वये (ଦୁଇ ପାଦରେ), अनुभवति - अनुभवं करोति (ଅନୁଭବ କରୁଛି), काश्यां - वाराणस्याम् (କାଶୀରେ), स्थापयामि - स्थापनं करोमि (ରଖିବି), बालुकायाम् - सैकते (ବାଲିରେ), अभिज्ञानार्थम् - सङ्केतार्थम् - (ଜାଣିବା ପାଇଁ), रचयति - निर्माति - (ତିଆରିକଲା), चकितः- आश्चर्यान्वितः (ଆଶ୍ଚର୍ଯ୍ୟ ହେବା), अन्वेषणम् - अनुसन्धानम् (ଖୋଜିବା), प्राप्नोति - लभते (ପାଇଲା), नष्टीकरोति - विनाशयति (ନଷ୍ଟକଲା), प्रमत्तः - उन्मत्तः (ପାଗଳ), ताडयन्ति - प्रहारं कुर्वन्ति (ପିଟିଲେ), पारमार्थिकः - वास्तविकः (ବାସ୍ତବିକ), गङ्गासैकतलिङ्गेन - गङ्गानद्याः कूलस्थबालुकालिङ्गेन (ଗଙ୍ଗା ନଦୀର ବାଲିରେ ତିଆରି ଶିବଲିଙ୍ଗ ଦ୍ୱାରା), धनभाजनम् - धनपात्रम् - (ଧନପାତ୍ର) ।

## अभ्यासः

### १. उच्चैः पठत, लिखत - (अकारान्त - पुंलिङ्गशब्दाः)

#### सप्तमीविभक्ति :

| | एकवचने | द्विवचने | बहुवचने |
|---|---|---|---|
| बालक | बालके | बालकयोः | बालकेषु |
| **शून्यस्थानानि पूरयत** | | | |
| देव | ........... | ........... | ........... |
| गज | ........... | ........... | ........... |
| आकाश | ........... | ........... | ........... |
| हस्त | ........... | ........... | ........... |
| मार्ग | ........... | ........... | ........... |

#### आकारान्त-स्त्रीलिङ्ग-शब्दाः (सप्तमीविभक्तिः)

| | | एकवचने | द्विवचने | बहुवचने |
|---|---|---|---|---|
| लता | - | लतायाम् | लतयोः | लतासु |
| **शून्यस्थानानि पूरयत** | | | | |
| गीता | - | ........... | ........... | ........... |
| पत्रिका | - | ........... | ........... | ........... |
| मुद्रिका | - | ........... | ........... | ........... |
| पुस्तिका | - | ........... | ........... | ........... |
| कथा | - | ........... | ........... | ........... |

## ईकारान्त-स्त्रीलिङ्गशब्दाः

| | एकवचने | द्विवचने | बहुवचने |
|---|---|---|---|
| नदी | नद्याम् | नद्योः | नदीषु |
| **शून्यस्थानानि पूरयत** | | | |
| देवी | ........... | ........... | ........... |
| भवती | ........... | ........... | ........... |
| रजनी | ........... | ........... | ........... |
| काशी | ........... | ........... | ........... |
| पुत्री | ........... | ........... | ........... |

## अकारान्त-नपुंसकलिङ्गशब्दाः

| | एकवचने | द्विवचने | बहुवचने |
|---|---|---|---|
| फल | फले | फलयोः | फलेषु |
| **शून्यस्थानानि पूरयत** | | | |
| जल | ........... | ........... | ........... |
| पत्र | ........... | ........... | ........... |
| गृह | ........... | ........... | ........... |
| द्वार | ........... | ........... | ........... |
| कूल | ........... | ........... | ........... |

२. **उदाहरणानुसारं शून्यस्थानं पूरयत -**

(क) अहं *विद्यालये* पठामि । (विद्यालय - ७मी - एकवचनम्)

(ख) भिक्षुकः ................. स्नानं करोति । (नदी - ७मी एकवचनम्)

(ग) माता .................. शेते । (शय्या - ७मी एकवचनम्)

(घ) बालकः .................. क्रीडति । (प्रान्तर - ७मी एकवचनम्)

(ङ) शिक्षकः .................. पाठयति । (कक्षा - ७मी एकवचनम्)

**३. बन्धनीमध्यस्थ-यथार्थपदेन शून्यस्थानं पूरयत -**

(क) तेषु <u>विद्यालयेषु</u> छात्राः पठन्ति । (विद्यालये, विद्यालययोः, विद्यालयेषु)

(ख) .................. प्रधानमन्त्री निवसति । (राजधान्यां, राजधानीं, राजधान्या)

(ग) वानराः .................. उपविशन्ति । (वृक्षम्, वृक्षे, वृक्षाः)

(घ) महिलाः .................. सन्तरन्ति । (नद्यः, नद्याः, नद्याम्)

(ङ) .................. सम्मर्दः भवति । (लोकयानेषु, लोकयानेन, लोकयानस्य)

**४. उचितेन पदेन शून्यस्थानं पूरयत -**

यथा - **<u>ग्रामे</u>** एकः भिक्षुकः आसीत् ।

(क) पदव्रजेन गच्छन् ................ पीडाम् अनुभवति ।

(ख) तस्य ................ महान् विश्वासः ।

(ग) अतः तं स्मरन् दिनद्वयात् परं ................ प्रविशति ।

(घ) ................ स्नानम् अवश्यं करणीयम् इति नियमः ।

(ङ) चोरभयेन ................ बालुकायां गर्तं कृत्वा तत् स्थापयति ।

(च) सः ................ एकं लोकं पश्यति ।

(छ) ................ एकं शिवलिङ्गं च पश्यति ।

(ज) ................ लोकान् ................ लिङ्गानि च पश्यन्ति ।

(झ) ................ लोकः न लोकः पारमार्थिकः ।

(ञ) गङ्गासैकतलिङ्गेन नष्टं मे ................ ।

(श्रीविश्वनाथे, पादयोः गङ्गानद्याम्, काश्याम्, नदीतीरे, नद्याम्, नदीकूले, गङ्गाजले, कूले, धनभाजनम्, गतानुगतिकः)

५. **उदाहरणं दृष्ट्वा प्रश्नान् लिखत -**

उदाहरणम् :

ग्रामे एकः भिक्षुकः आसीत् ।

**प्रश्नः -** ग्रामे **कः** आसीत् ?

भिक्षुकः अवशिष्टं धनं पात्रे स्थापयति ।

**प्रश्नः -** भिक्षुकः अवशिष्टं धनं **कुत्र** स्थापयति ।

(क) सः **बालुकायां** गर्त्तं करोति ?

प्र.................................................................................. ?

(ख) बालुकया **शिवलिङ्गं** करोति ।

प्र.................................................................................. ?

(ग) **तस्य** उपरि चिह्नं स्थापयति ।

प्र.................................................................................. ?

(घ) सः **गङ्गाजले** एकं लोकं पश्यति ।

प्र.................................................................................. ?

(ङ) **सः** चिन्तयति ।

प्र.................................................................................. ?

(च) **नद्यां** लोकान्, **कूले** लिङ्गानि च पश्यन्ति ।

प्र.................................................................................. ?

(छ) **यात्रिणः** तं प्रमत्तः इति चिन्तयन्ति ।

प्र.................................................................................. ?

(ज) सः **दुःखेन** कथयति ।

प्र.................................................................................. ?

(झ) **गतानुगतिकः** लोकः ।

प्र.................................................................................. ?

(ञ) **गङ्गासैकतलिङ्गेन** नष्टं मे धनभाजनम् ।

प्र.................................................................................. ?

६. **मातृभाषया अनुवादं कुरुत -**

(क) एकस्मिन् ग्रामे एकः भिक्षुकः अस्ति ।

..............................................................................................

(ख) एकदा सः पश्यति, पात्रं पूर्णम् ।

..............................................................................................

(ग) मध्ये मध्ये विश्रामं करोति ।

..............................................................................................

(घ) तस्य श्रीविश्वनाथे महान् विश्वासः ।

..............................................................................................

(ङ) मन्दिरगमनात् पूर्वं गङ्गानद्यां स्नानं करणीयम् इति नियमः ।

..............................................................................................

(च) तस्य उपरि चिह्नं स्थापयति ।

..............................................................................................

(छ) आनन्देन गङ्गायां स्नानं च करोति ।

..............................................................................................

(ज) सः गङ्गाजले एकं लोकं पश्यति ।

..............................................................................................

(झ) अत्र एका परम्परा अस्ति ।

..............................................................................................

(ञ) एवं चिन्तयित्वा सः अपि तथा करोति ।

..............................................................................................

(ट) सर्वे शिवलिङ्गानि रचयन्ति ।

..............................................................................................

(ठ) इदानीं भिक्षुकस्य स्नानं समाप्तम् ।

..............................................................................................

(ड) यात्रिण: तं प्रमत्त: इति चिन्तयन्ति ।

.........................................................................................

(ढ) बहुकष्टेन सञ्चितं धनपात्रं न प्राप्नोति ।

.........................................................................................

(ण) गङ्गासैकतलिङ्गेन नष्टं मे धनभाजनम् ।

.........................................................................................

**७. विक्षिप्तवर्णा: सन्ति, शुद्धं शब्दं रचयत -**

यथा - न ध भा ज म् न - धनभाजनम्

(क) क क्षु स्य भि - ..................................................

(ख) मा स प्त म् - ..................................................

(ग) र म्प रा प - ..................................................

(घ) न्त चि त्वा यि - ..................................................

(ङ) लि नि ङ्गा व शि - ..................................................

(च) हु ब ष्टे न क - ..................................................

(छ) ण: त्रि या - ..................................................

(ज) न्दे न न आ - ..................................................

(झ) लु बा यां का - ..................................................

(झ) क: ग नु ता ग ति - ..................................................

**८. मूलशब्दं लिखत -**

उदाहरणम् : (क) एकस्मिन् - एक

(ख) ग्रामे - ग्राम

(ग) काश्याम् - काशी

तथा : (घ) बालुकायाम् - ..........................

(ङ) नद्याम् - ..........................

(च) गङ्गायाम् - ..........................

(छ) पादयोः - ..........................

(ज) भिक्षुकस्य - ..........................

(झ) यात्रिणः - ..........................

९. **विषयानुसारं स्तम्भद्वयं योजयत ।**

| **'क'** | **'ख'** |
|---|---|
| पादयोः | आसीत् |
| भिक्षुकः | गर्त्तम् |
| बालुकायां | पीडाम् |
| नदीकूले | स्थापयति |
| पात्रे | शिवलिङ्गम् |
| सः | क्रन्दति |

१०. **विषयानुसारं संशोधनं कुरुत -**

(क) एकदा सः पश्यामि, पात्रं पूर्णम् ।

(ख) तस्य श्रीविश्वनाथात् महान् विश्वासः ।

(ग) सः प्रथमतः गङ्गाकूलस्य लिङ्गं रचयति ।

(घ) नद्यां लोकान् कूलस्य लिङ्गानि च पश्यन्ति ।

(ङ) निजशिवलिङ्गेन अन्वेषणं करोति ।

(च) गतानुगतिकः लोकं न लोकः पारमार्थिकः ।

(छ) बहुकष्टेन सञ्चितः धनपात्रं न प्राप्नोति ।

•